No. ४२४८

Title शास्त्रदीपिका तृतीयाध्याय:

Author पार्थसारथि मिश्र:

Extent ८२ पत्र Age १६४१

Subject मीमांसा

प्रामन्त्रदीपिकातृतीयाध्यायः

५२४९

3, 26, 28, 57 double

F. = 76

शास्त्रदीपिकातृतीयाध्याय

श्रीगणेशाय नमः ॥ १ ॥ अथातः शेषलक्षणं । एवं सिद्धे भेदे शेषशेषित्वमिदानीं चिंत्यते । भिन्नानां हि तत्संभवति
नाभिन्नानां । मिति भेदलक्षणस्य हेतुत्वं । यद्यपि व्रीहीन् अवहंति सोमेन यजेतेत्यादिषु द्रव्यकर्मणां शेषशेषिभावो
न कर्मभेदापेक्षस्तथापि कर्मणामपि प्रयाजाग्नेयादीनां शेषशेषित्वमिहैव वक्तव्यमिति तत्सिध्यर्थं भेदलक्षणा
पेक्षणं । ननु चावघातस्यापि व्रीहिनिर्धज्ञेतेति शास्त्रांतरार्थं न शेषशेषित्वचिंतान व्रीहिपदार्थमात्रेण शास्त्र
लो भेद लक्षणं च वस्तुवर्त्तमिति भवति हेतुत्वं । किं व्रीहीन् अवहंति व्रीहिभिर्यजेतेत्यनयोः शास्त्रयोर्भेदोस्ति । ॐमि
तिचेत् । केन खलु । न तावन्निरपेक्षसाध्यभेदो नास्ति । नाप्यनुबंधभेदो येन शास्त्रभेदः स्यात् । तस्माद्वाक्यांतर नियोगविष
त्वमेवात्र न शास्त्रांतरत्वं । न च वाक्यभेदलक्षणं प्रवर्त्तितं । सोमेन यजेतारुणया क्रीणातीत्यादिषु वाक्यांतरत्व य त्वर्थभे
मपि नास्ति द्वादेव शास्त्रभेदः । ननु तत्रापि ज्योतिष्टोमेन स्वर्गकामो यजेतेति शास्त्रांतरविहिताधिकारसंबंध दः ६
१ स्यैव यागस्य शेषः सोमः । नं सोमज्योतिष्टोमवाक्ययोरनुबंधसाध्यभेदोस्ति । उच्यत्रापि सोमयागस्यैव विष
यत्वेनानुबंधभेदाभावात् निरपेक्षसाध्यभेदाभावाच्च । उद्भिदा यजेत पशुकामः सोयं चरुं निर्वपेत् ब्रह्मवर्चस
४म कामइत्यादौ स्ववाक्यतएव फले यागस्य द्रव्यदेवतस्य च यागे शेषत्वमिति वाक्यांतरत्वमपि नास्ति । तथैकस्मिन्न
वपदे प्रत्ययार्थभावनाम प्रवर्त्तं वाप्रतिप्रत्ययार्थस्य यागस्य शेषत्वात्पदभेदोपि नास्ति । न तरां वाक्यभेदो न तमां अर
च शास्त्रभेदः । तस्मात्कर्मणामेव शेषशेषित्वचिंतार्थं भेदलक्षणापेक्षणं । तोपि न शास्त्रभेदापेक्षा तदभावे
प्यवघाताग्नेयादीनां शेषशेषित्वात् । तस्मात्कर्मभेदानुजाषणमेवैतत् नानाकर्मलक्षणं हत्तमिति न तर्द्व गाम

नहि ६

शास्त्रभेदानुभाषणं। तस्येहानुपयोगात्। अतएव कर्मभेदएव पूर्वाध्यायार्थो न शास्त्रभेदः। सौत्रेण चातःशब्दे
न पूर्ववृत्तस्येह हेतुत्वमुच्यते तुहेतुत्वं च कर्मभेदस्यैव संभवति न शास्त्रभेदस्येत्युक्तं। अतः सूत्रभाष्यविपरीतं शा
स्त्रभेदस्याध्यायार्थत्वं। अयुक्तं च। अनुबंधांतरं हि बुध्यमानस्तदनुबंधनियोगांतरमेव बुध्यते न मध्ये शास्त्रभे
दं अतो नासौ चोदनार्थो चोदनार्थश्च न विचारमर्हतीति इति न तद्विचारार्थं भेदलक्षणापेक्षणं इत्यास्तां
तावत्। बहुप्रकारं चेदं शेषलक्षणं वक्ष्यते कः शेष इति तत्स्वरूपं केन हेतुना शेष इति शेषशब्दप्रवृत्तिनिमित्तं क
थं विनियुज्यत इति विनियोगप्रकारः श्रुत्यादीनि च विनियोगे शेषस्य शेषिणा सहान्वयबोधने कारणानि
प्रमाणानि तेषां च विरोधे बलाबलं विरोधश्च क्वास्ति क्व च नास्तीति देतत्सर्वमभिसंधाय शेषलक्षणं व
क्ष्याम इति सूत्रितं। तदनेन सूत्रेण श्रोतृबुद्धिसमाधित्सया वक्ष्यमाणार्थप्रदर्शनमात्रं कृतं नात्र सर्वपक्षे
ण प्रयोजनं॥१॥ शेषः परार्थत्वात्। उक्तं शेषलक्षणं वक्ष्यत इति तदिदमुच्यते। प्रथमं तावदनेन सूत्रेण
शेषस्वरूपं हेतुश्च श्रुत्यर्थाभ्यामुच्यते। तत्र सूत्रे श्रुत्या हेतुरुच्यते परार्थत्वाच्छेष इति स्वरूपं त्वर्थात् यदा हि पा
रार्थ्यं शेषशब्दप्रवृत्तौ हेतुस्तदा परार्थ एव शेष इति सिद्धं भवति। भाष्ये तु यः परार्थः स तावत्शेष इति ब्रूम इति स्वरू
पं श्रुत्योक्तं अर्थात्तु हेतुरिति द्रष्टव्यं। अत्र चाविनाभावादिलक्षणाभासनिराकरणाय परार्थत्वलक्षणमुच्यते। के
चित्किलयेन विना यन्न भवति बीजादिना अंकुरादिः स बीजादिस्तस्यांकुरादेः शेष इत्याहुः तदयुक्तं। सूपरसादी

२४

रु४

न १

नामग्न्येयादीनां च मिथो विनाभावे शेषत्वापत्तिः। प्रयोज्यत्वं शेषत्वमित्येतदपि पुरोडाशकपालादिष्वप्रयोज्येष्वपि
शेषत्वसंभवादव्यापकं। अन्ये तु यद्यस्मादधिकं विधीयते स तस्य शेष इत्याहुः तदपि मंदं। अंगप्रधानानां परस्प
राधिक्यात्। अन्ये तु विध्युद्देश्यविहितत्वं शेषत्वमाहुः तदपि विध्याद्विहितानामपि शाखाच्छेदादीनामंगत्वद
क३ र्शनादयुक्तं। तस्मादुपकारत्वमेव शेषत्वमित्यन्ये। तदप्ययुक्तं। प्रधानान्यप्यंगानामनुष्ठानोपयोगं कुर्वंति
शेषत्वं गच्छेयुः। तस्मात्पारार्थ्यमेवैकं युज्यते शेषलक्षणं। परोद्देशप्रवृत्तिश्च पारार्थ्यमभिधीयते॥१॥ कथं
२ तर्हि कृत्यादिलक्षणं शेषत्वं। न हि सोमेन यजेतेति तृतीयया परोद्देशप्रवृत्तत्वं सोमस्योच्यते। करणमात्राभिधानात्।
उच्यते। न कृत्यादयः पारार्थ्यमभिदधतीति ब्रूमः किं तर्हि विधिसहिताः पारार्थ्यं बोधयंतीति विधिरपि नाभिधा
नेन पारार्थ्यं गमयति किं त्वर्थापत्त्या। सहि चेतनप्रवर्त्तमानं चानुदिश्य फले व्यापारे चेतनः प्रवर्त्तयितुं शक्यते इ
१ त्यर्थाद्विधिविषयस्य व्यापारस्य फलोद्देशप्रवृत्तता गम्यते फलार्थश्च व्यापारः फलवदेव पुरुषस्याभिलषि
त इति तत्साधनत्वेन कृत्यादिभिरवगतानां तत्साधनत्वेन च विधीयमानानां सोमादीनामपि तदुद्देशप्रवृत्तिः सि
द्धा भवतीति तस्माद्युक्तं कृत्यादिगम्यं पारार्थ्यं लक्षणं शेषत्वमिति॥२॥ द्रव्यगुणसंस्कारेषु बादरिः। अत्र शे
षत्वस्य विषयकथनेन कः शेष इत्ययमंशः प्रपंच्यते। बादरिर्द्रव्यसंस्कारगुणेष्वेवाह शेषतां। कृत्यादि २
दर्शनात्त्वेते कर्मणामुपकाराः॥१॥ उपकारकत्वमेव शेषत्वं न पारार्थ्यं तस्य बोधकाभावात्। विधिस्तावत्प्रवर्त्तना

कार १ ना ६

॥ तृतीयस्यानंकपुटस्य पंचमपंक्तौ इदं शोधपत्रं देयं ॥

स्वर्गोऽपि काम्यमानात्मना शब्देनोच्यते। न चात्मार्थः परार्थो वेति। तस्मान्न तयोः शेषत्वं। अ
त एव न पुरुषस्य शेषिता॥ शेषत्वं तु तस्य द्रव्यत्वादिष्टमेव। तस्माद्द्रव्यगुणसंस्कारेष्वेव शेष
त्वमिति। तदेतत्स्वर्गकामाधिकरणपूर्वपक्षवादिनो बादरेर्मतं। जैमिनिस्तूपकारलक्षणस्य
शेषत्वस्योक्तदोषत्वात् पारार्थ्यमेव शेषत्वं। तच्च विधिगम्यमिति। स्वर्गकामाधिकरणसिद्धांते
वक्ष्यमाणमपि प्रेत्यकर्मणामपि पारार्थ्याच्छेषत्वमाह। तदेतत्तत्रसिद्धमिति नात्र किंचित्प्र
तिपाद्यं। प्रपंचमात्रं त्विह सर्वोक्तशेषत्वविषयस्य क्रियते। प्रपंचं तु कुर्वन्परमतोपन्यासपुरः
सरं स्वमतमुपन्यस्तवान्। एवं फलस्यापि पुरुषशेषत्वं कामवशादेवावगम्यते। विधिवशा
च्च। नह्यन्यार्थं कश्चित्कामयते। य[illegible]पि परार्थं कामयते तदपि परंपरया स्वार्थमेव। अत्र तु
परंपराप्रमाणाभावादवगम्यते। विधिवशाच्च ना[illegible]
त्मार्थफलसाधने प्रवर्त्तयितुम[illegible]शक्नुवन् फलस्यात्मार्थतां गमयति। यजेतेति चात्मनेपद

दात्मार्थते २

निर्देशात्। तस्माद्यागफलयोरप्यस्ति शेषता। ततश्च पुरुषस्यापि शेषित्वं। नचैवं स्वर्गतः प्रधा
नत्वात्पुरुषस्य शेषत्वं नास्तीति मंतव्यं। आख्यातेन कर्तृगुणत्वेनोपादानात्। औदुंबरीसं
३ मानादिषु तु स्थैव गुणत्वात्॥ ॥ तेषामर्थेन संबंधः॥ कः शेषः केन हेतुना शेष इति द्वयमप्यु
क्तं। इदानीं कथं विनियुज्यत इत्ययमंशो निरूप्यते। दर्शपूर्णमासयोर्निर्वपणप्रोक्षणावघा
तादय औषधधर्मा उत्पवनादय आज्यधर्माः शाखाहरणादयः सान्नाय्यधर्माः श्रुतास्तेषु
३/१ संशयः। किं सर्वे औषधे आज्ये सान्नाय्ये च कर्तव्या उत यथासंयोगं व्यवस्थेति। तदर्थं च किं
परमापूर्वप्रयुक्ता एते किं वावांतरापूर्वप्रयुक्ता इति तत्सिध्यर्थमपि किमवांतरापूर्वाणि संति न वे
ति। सत्स्वपि च तेषु किं तानि प्रयोजकानि किं वा परमापूर्वं। यदापि तानि तदापि किं सर्वाणि सर्वेषां प्रयोजका
नि किं वा व्यवस्थेति। किं प्राप्तं। एकमेव फलापूर्वं फलस्यैकस्य सिद्धये। कल्प्यं नान्यानि धर्माणां तादर्थ्यात्सं
करो भवेत्। अवघातादीनां व्रीह्यादिभिः संबंधोपूर्वसाधनविशेषत्वकृतो न व्रीह्यादिस्वरूपकृतः। तथा राम ३
पूर्वं सर्वेषामाग्नेयादीनामेकफलसाधनत्वादेकमेव कल्प्यते न बहूनि तदर्थं अवघातस्तदीयहविषि कर्तव्य

स्त्वा

मन्त्ररूपो न तादर्थ्यं गमयति। अग्न्यादयोऽपि साध्यसाधनतावमात्रपरां न तादर्थ्यं प्रतिपादयन्ति। तस्मादुपकारक-
त्वमेव शेषत्वं। तच्च दृष्टार्थानां द्रव्यगुणकर्मणां दर्शनादेवावगम्यते प्रोक्षणादीनां तु अग्न्यादिलिङ्गैः। द्वितीयादि-
व्रीहीणां प्रोक्षणं प्रति साध्यत्व मत्सन्निधानोपकारमन्तरेण तदनुपपन्नेरूपकारं गमयति। न तु यागस्य फलशेष-
त्वे फलस्य वा पुरुषशेषत्वे प्रत्यक्षं दर्शनं अग्न्यादयो वा संभवन्ति यस्तु तेनेति यागः कर्तव्य इत्येतावदुच्यते न तु यागेन
फलमिति। तदेतत्स्वर्गकामाधिकरणापूर्वपक्षे वक्ष्यामः। दीनामप्यविशिष्टं ततो यथा व्रीहिषु अग्न्यादयो तो यं ५
प्यवेषु पि लवत्येवमाज्यादिष्वपि लविनुमर्हन्ति। संभवावान्तरापूर्वाणि तथापि तानि तिफलत्वाद्यागस्वरूपव- ब्फ ६
देव न धर्माणां प्रयोजकानि परमापूर्वं तु फलवदतस्तदेव प्रयोजकं। न चावान्तरापूर्वं नियमन्याय्यः तत्र हि दीक्षणीया- त्रे ७
श्च दीक्षणीयापूर्वलक्षणायां पश्चात्पयति ज्योतिष्टोमापूर्वं तु लक्षितलक्षणायेत्यति विप्रकर्षः। अत्र तु परमा-
पूर्वमवान्तरापूर्वं च द्वयमप्याग्नेयादिसाध्यमिति न लक्षणायां विशेषः प्रधानत्वाच्च परमापूर्वमेव प्रयोजकं
युक्तं। यद्यपि चावान्तरापूर्वाण्येव प्रयोजकानि तथापि प्रकरणविशेषात्सर्वाणि सर्वेषां प्रयोजकानि। तस्मात्सं-
करइति। अन्ये त्वाहुः नाधीयते। संति तावदवान्तरापूर्वाणि। कुतः। न ह्याग्नेयादिकर्माणि विशेरात्स्तानि ते विना। संहत्य पर-
मापूर्वं जनयन्ति स्वरूपतः॥१॥ तदेतदपूर्वाधिकरण एव नानागतावेक्षणेन प्रतिपादितं। सत्सु च तेषु तादर्थ्यमेवान-
घातादेर्युक्तं प्रत्यासत्तेः। यद्यपि चाग्नेयादीन्येवान्यत्र कारणं। तथापि साक्षादुत्पत्त्यपूर्वे कारणत्वं तद्द्वारेण तु परमापू-

ता१ २१

र्वा॰ संबंधनिमित्तावलक्षणा। तेनव्रीहिशब्दो यागद्वारेणाऽपूर्वमुपस्थापयन् अथ मंवत्त दपूर्वे निपतितस्यापि चा
दृष्टत्वेनाद्वा तत्प्रकारत्वात्परमापूर्वसिद्ध्यौपयिकत्वेन च फलवत्वादतिक्रमकारणाभावात् तादर्थ्यमेवावघातादे
र्युक्तं। सत्यपि च सर्वेषां प्रकरणाविशेषे श्रुतेर्बलीयस्त्वावगमादसंकरः। एवं चावघातादेर्दृष्टार्थता जनाति। अ
न्यथा त्वदृष्टार्थता स्यात्। न च क्वचिद् विदृष्टसंभवे तत्र एव विध्युपपत्तेरर्थापत्तिपरिक्षयाददृष्टकल्प
नया सर्वार्थत्वं युक्तं। अतश्च यद्यपि तावुदवहंतीत्येतावन्मात्रं श्रूयेत। तथापि दृष्टार्थवशादेवव्यव
स्था स्यात्। किमुत यदा व्रीह्यादिसंयोगे नैव श्रवणं। तस्माद्यथासंयोगं व्यवस्था। ४॥ द्रव्यं चोत्पत्ति
३ संयोगात्तदर्थमेव चोद्येत॥ दर्शपूर्णमासयोःस्फ्यश्चकपालानि चोत्याद्युपक्रम्ये तानि वै दश य
ज्ञायुधानीति श्रुतं। तथा स्फ्येनोद्धंतीत्यादीन्यवदानिवचनानि। तत्र संशयः। किं स्फ्यादिना येन यदाशि
न्यकारणे शक्यं तत्सर्वं तेन कर्तव्यमुत यथासंयोगं उद्धननाद्येवेति। तत्रायुधशब्दसाधनवचनत्वा
द्यद्यत्साधनत्वं गम्यमानं साक्षाद् संभवदंगेष्वव्यतरदविशेषात्सर्वांगेषु विज्ञायते। उद्धननादिसंयोगस्त
नेनैव प्राप्तत्वाद्युक्त्यानुवादः। नैतद्युक्तं। एवं हि बहूनामुद्धननादिवाक्यानामानर्थक्यं स्यात्। न चा
त नुवादत्वमपि संभवति। नित्यप्राप्त्यभावात्। न ह्युद्धननं स्फ्येनैव प्राप्तं अन्येनापि संभवात्। पाक्षिका राम
नुवादत्वे वा नित्यवच्छ्रवणाविरोधः। तस्मादेतानि वाक्यानि विधायकानि। यज्ञायुधवाक्यं तु तैरेव प्राप्तार्थ २
स्य

त्वाद्देशद्रोपवंधादारव्यातामावा ख्यानुवादकं। वरंवन्दोनर्थक्यादेकानर्थक्यं। नंवास्यानर्थक्यं। यद्दापुष्पान्ति
संजरंतीत्यनंतरश्रुतासादनविधिशेषत्वात्। तस्मादस्यानुवादत्वादितरे विधयो मताः। तेनस्थमादे र्व्यवस्था
स्यात्कार्यंषूद्दननादिषु।।५।। अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्।। ज्योतिष्टोमे श्रूयते॰ अ
रुणया पिंगाक्ष्यैकहायन्या सोमं क्रीणातीति। तत्रारुणाशब्दोयमारुणस्य धिकरणान्यायेनान्वयव्यति
रेकाभ्यां गुणवचनः। पिंगाक्ष्यैकहायनी शब्दौ योगिकौ सामानाधिकरण्यादेकद्रव्यवाचिनो। गुणा
धिकापफलं चशब्दद्वयं। न चैकेन विहितेपरेण विधिर्नसंजवतीति वक्तव्यं। उजयोरपिश्रुत्यैव द्रव्यवा
चकयोर्युगपत्समरणेतः। तद्विहारुणिमानं प्रतिसंदेहः। किमेनं वाक्याद्धिलाप्रकरणेन सर्वद्रव्येषु विनिवे
शयामः। किंवा क्रीणातिना संवध्यतदंगसन्नेकहायन्यां निविशतइति। नदर्थंक्रियासाधनत्वं संजवति
नेति। तत्र। अमूर्त्तत्वाद्गुणो नैव क्रियांसाधयितुं क्षमः। तस्मात्क्रीणातिनानास्यसंजवत्येकवाक्यता।।१।। क्री
णातिनाचा [illegible] सं [illegible] वध्यमानस्तृतीयासंयोगात्करणकारकं स्यान्नचामूर्त्तस्य करणकारकं थमस्यनिवे
शः नेतावक्रियानिरमूर्त्तत्वात्। न चद्रव्यैः कारकस्यद्रव्यसंवंधानुपपत्तेः अनुपात्तानिचात्रद्रव्याणि कथं
तैर्गुणाः संवध्येत। स्यादेतत्। तृतीयया करणद्रव्याणि प्राकरणिकान्यनूद्यमातिपदिकार्थो गुणस्तस्मरिच्छे
दकत्वेन विधीयतेनतु गुणस्य कारकत्वं येन द्रव्यसंवंधो नस्यात्। तृतीययाचोपादानात् द्रव्याणां नानुपा
दानदोषइति। नैतद्युक्तं। नहि तृतीयाकरणीभूतद्रव्याभिधायिनीविजक्त्यो हि कारकशक्तिं ध्रू व्याभिधा नि
xत्वसंभवतीतिनास्याक्र यसंबंधइति ततःप्रथग्भूतः प्रकरणे निविशतइति।
नन्नुप्रकरणेबाक [illegible] x४

राम

पंचमीसमासः१

यंनयाक्रियांविशिंषंति ननु तृतीं नकरणादिशब्दवत्कारकोपसर्जनं द्रव्यमभिदधाति येन गुणास्तत्परिच्छेदक
तयासंबध्येत। उच्यते। प्रातिपदिकस्तत्र गुणवचनमविलक्षणया द्रव्यं प्रतिपादयति। तत्र तृतीयासंयोगा
त्करणं। तदनेन पदेन गुणविशिष्टं द्रव्यं करणभूतं प्रतिपाद्यते तच्च विशेष्याणि करणद्रव्याणि प्रकरणगता
५ घ५ न्यनूद्य विशेषणभूता गुणाः परिच्छेदकत्वेन विधीयते। येन द्रव्येण किंचित्क्रियते तेनारुणगुणकेनेति। नन्वे
वं लक्षितस्य द्रव्यस्य क्रयएवकरणत्वसंभवात्किमिति वाक्यभेदः। नानेन लक्षितं द्रव्यांतरं शक्यं विधातुं। श्रो
तेकहायन्यवरुद्धत्वात्क्रयस्य। एकहायिनी तु स्वरूपा द्रविहिता न पुनर्लक्षणया विधातुं शक्यते। अर्थैक
हायिनीमेवानद्यतत्रैव गुणो विधीयते। न भविष्यति वाक्यभेदः। नैवं शक्यं। विधीयते हि तत्रैकहायिनी
४ क्रयं प्रति। गुणभूता च स्वार्थाच्च। नासावेकस्मिन्नेवोच्चारणेनुवदितुं। गुणत्वं प्रतिप्रधानीत्त विर्तुं। परार्थत्वा उद्देश्य
उपादेयाध च्चारयितुं शक्यते। आवृत्तिप्रसंगात्। प्राकरणिकानि तु द्रव्याणि वाक्यांतरविहितानि शक्यंते वाक्यांतरे
नुवदितुं। तस्मात्कृत्स्ने प्रकरणे रूपाणि मानि विशंत इति प्राप्ते ब्रूमः। तृतीयया गुणस्यैव करणत्वं क्रयं प्रति।
विस्पष्टं गम्यते तच्च द्रव्यव्यवहारेणायुज्यते।१। यद्यप्यमूर्तत्वादयं न साक्षात्क्रियां साधयितुमलं तथापि द्रव्य
परिच्छेदमुखेन शक्नोति साधयितुं। न ह्यपरिच्छिन्नं द्रव्यं क्रियां साधयति। गुणश्च तत्परिच्छिनत्तीति युक्त ४
मस्य क्रियासाधनत्वं। गुणं हि साधनत्वेन विदधच्छब्दो यथानेन शक्यते साधयितुं तथा कुर्यादित्याह। सव

एकसाध्यकगुणकर्मत्वा दे

द्रव्यपरिच्छेदमुखेन शक्नोति साधयितुं नान्यथा। तेनायमर्थो भवति। अरुणा परिच्छिन्नेन द्रव्येण
कुर्यादिति। एवं संभवति सो तस्यैव गुणस्य क्रयेकवाक्यत्वे लक्षणा वाक्यभेदश्च न प्रयुज्यते। यदा च क्रयार्थ
त्वं तदा तदीयद्रव्ये निवेशादेकहायन्यामेव निदेशः। ननु वासःप्रभृतीनामप्यान्यविक्रयद्रव्याणि तेषां वि
निविशेनानाते षां क्रयांतरद्रव्यत्वात्। भिन्ना ह्येते प्रतिवाक्यं क्रयाः विधिभेदात्। सर्वे ह्येते विधयोऽन्योन्यस्मि
न्नुत्पत्तिशिष्टद्रव्यावरोधात् द्रव्यांतरं विधातुमशक्नुवंतस्तत्तद्द्रव्यविशिष्टक्रयविधानार्थाः न च विहितस्य
विधानं संभवतीति सिद्धः क्रयभेदः। यदाह भाष्यकारः भिन्ने हि वाक्ये एकहायनीसाधनक एकः क्रयो बबु
द्धो भवति। अरुणासाधनकमपि क्रयांतरमिति। एवं हि वदन् वाक्यभेदे क्रयभेदं दर्शयति। तेन ये गुणकर्मत्वा
क्रयाणां भेदं नेच्छंति ते नापि विरोधाद्भाष्यविरोधाच्चोपेक्षणीयाः। न च गुणकर्मणां भेदो नास्तीति राजा
न्ना। ऐंद्रवायववादिग्रहाणां भेदस्य पशुसामाधिकरणे दर्शितत्वात्। अतोऽस्ति क्रयभेदः क्रयंतेषु वि
कल्पः स्यादित्यत्राधिकरणे क्रयाणामेव विकल्पसमुच्चयचिंता न द्रव्याणामित्यविरोधः। ६॥ एकत्व
युक्तमेकस्य श्रुतिसंयोगात्॥ एवं त्रिरधिकरणेः क्रमेण संस्कारद्रव्यगुणानां यथासंयोगं व्यवस्थो
क्ता। संयोग एव त्विदानीं चिंत्यते। किं विवक्षितविशेषणेन शेषिणा शेषस्य संयोगः किमविवक्षितवि
शेषणेनेति। एवं हि ग्रहं संमार्ष्टीति। तत्र संशयः किमेकस्य ग्रहस्य संमार्ग उत सर्वेषामिति। तदर्थं च किमु

दिश्यगतासंख्याविवक्षिता तनेति। तत्रकृतिवलाद्यद्वहुसंख्योपादेयगामिना। विवक्षितातथोद्देश्य
गताकृत्यविशेषतः॥१॥ इति प्राप्तेभिधीयते। उद्देश्यलक्षणं जातिर्यद्वद्रव्यं लक्ष्यते तया। तस्यां गमेनसंमा
र्गः सर्वस्येति विनिश्चयः॥१॥ यदि ग्रहस्वतेजो रयं संस्कारः स्यात्ततस्तस्याः प्रतिव्यक्तिसमाप्तेर्यत्र क्वचिद्द्र
व्ये संस्कृते सा संस्कृतैवेति नद्रव्यांतरे संस्कारः क्रियेत। तस्यास्स्वमूर्तत्वादसाधनत्वाच्च तदुपलक्षितानां द्रव्या
णां ज्योतिष्टोमाङ्गर्वसाधनानामयं संमार्गः। तत्रापि यदि द्रव्यान्तिसंमार्गप्रतिगुणं भूतानिस्फः पश्चुरिव
याङ्गं प्रतितन्तोयेनकेनापि सिद्धेर्नावश्यं सर्वत्र क्रियेत। नहि यावद्गुणं प्रधानमावर्त्तयितव्यं प्रयोजना
भावात्। तत्रश्च क्रियतां द्रव्येणायं संमार्गः कर्त्तव्यद्रूपपेक्षानुवति तस्यामपेक्षायां परिच्छेदकत्वेन संख्या वि
धीयते पश्वेकत्ववत्। प्रधानानि हि द्रव्याणि संमार्गं प्रति द्वितीयानिर्देशात् प्रयोजनवत्वाच्च प्रति प्रधानं च गु
णा इत्येतेः समुच्चितानामयं संस्कार इति निश्चयान्नपरिच्छेदकापेक्षा तदभावाच्च न संख्यापूर्ववदादर्त्तव्या।
परिच्छेदकतयाविधातुं शक्यते। विधीयमानमध्ये कत्वं सर्वद्रव्येषु समुच्चयेन संमार्गप्राप्ते परिसंख्यार्थं स्या।
त्साच त्रिदोषा। नचैकस्मिन्वाक्ये संमार्गविधिः परिसंख्या च संभवति वचनव्यक्तिभेदात्। नचास्य विधिरपि
संभवति। कुतः। ग्रहस्य संमार्जने चैकत्वं प्रधानं गुणश्च धा। सर्वथा वाक्यभेदः स्याद तो नास्य विधेयता॥१॥ विधी
यमानं ह्येकत्वं यदि तावत् द्रव्यस्य विधीयते ततो ग्रहसंमार्ग संबंधो ग्रहैकत्वसंबंधश्चेत्यर्थद्वयविधानाद्वाक्य राम ५
न च परिच्छेदकत्वं संख्या इति द्वाराभावान्नक्रिया

X हि तस्याः क्रियान्वयः। न च
न्वयः संख्यायाः X ४

राम

भेदः विदितमपि चैकत्वं ग्रहस्वरूपमात्रोपक्षयान्न संमार्गविशेषणमिति सर्वेषां संमार्गः स्यादित्यस्मत्प
क्षाविरोध एव। अथ संमार्गान्वितस्य ग्रहस्यैकत्वसंबंधो विधीयते न स्वरूपस्य। नैवं शक्यं। न हि संमा
र्गान्वितग्रहविशेषणं। निर्ज्ञातं हि विशेषणं भवति। संमार्गस्त्विहापूर्वो विधीयते कथमसौ ग्रहविशेषणं। युग
पद्विधानविशेषणत्वयोरभ्युपगमे वाक्यभेदः ग्रहं संमृज्यादेकं च संमृज्यात् स एक इति। अथैकत्वविशिष्ट
स्य ग्रहस्य संमार्गरूपोऽर्थो विधीयते न कश्चित्पूर्वोक्तो दोषः स्यादिति मतं। कस्तदा भवति वाक्यार्थः। यद्ग्रहजा
तीयमेकसंख्यं च द्रव्यं तस्य संमार्ग इति एवमपि सर्वेषां प्रत्येकमेकत्वाद्ग्रहत्वाच्च संमार्गस्य च तद्गुणत्वात्सर्व
त्र प्राप्तिः स्यात्। अपि च। विनश्यत्यायुगपत्संख्याकारकं वोच्यते ननु प्रथमं संख्याप्रातिपदिकार्थः स्यात्तिधा
य पश्चात्तद्विशिष्टस्य कारकत्वं [illegible] येनैकत्वविशिष्टस्य संमार्गप्रतिकर्मता स्यात्। तन्न तावदेकत्वं
ग्रहविशेषणं। अथैतदपि पश्चैकत्ववद्विरुक्तिश्च स्याकारकं सत्क्रिययैव संबध्यते तत्रापि द्वयीगतिः स्या
देकत्वस्यांगं संमार्गः। संमार्गांगं वैकत्वं यदि तावदेकत्वांगं संमार्गः स्यात्ततो ग्रहमेकत्वं चोद्दिश्य संमार्ग
विधानादुद्देश्यद्वयोपादेयवत्क्रिययाभ्यशीकरणासंभवात्स्येकमेव तावत्क्रियासंबंधात्। प्रेसुद्देश्यभा
व समाहितेवाक्यभेदः। पुनरपि च ग्रहस्यैकतानपेक्षस्यैव संमार्गात्सर्वग्रहसंमार्गः स्यादित्यस्मत्पक्षसि
द्धिः। अथैकत्वं संमार्गस्य गुणाद्गुत्युच्यते। तदयुक्तं न हि द्वितीयागुणत्वं वदति प्राधान्यवाचिनी हि सा। अथस

कुर्वल्लक्षणया गुणत्वमुच्यते न श्रुतिसंनिवेशा युक्ता। किं च तथा सति ग्रहस्यापि गुणत्वं स्यात्। अथैकत्वस्य गुण-
त्वं ग्रहस्य च प्राधान्यमुच्यते ननु कथं कथंचित्सहदुपात्ताद्वितीयाविभक्तिर्ग्रहापेक्षया प्राधान्यं श्रुत्याभिद-
ध्यादेकत्वापेक्षया च गुणत्वं लक्षयेत्। तन्न कथंचिदेकत्वं लक्षयितुं शक्यं॥१॥ संस्कारा द्वा गुणानामव्यवस्था विवर
स्यात्॥ किमेकत्वं प्रातिपदिकार्थस्याविवक्षितत्वाच्चमसानामपि संमार्गः कर्त्तव्यः। उत विवक्षाका-
५ णा रणाभावाद्ग्रहाणामेवेति विचारः। तत्र संमार्ष्टीत्येतावत्युक्ते सोमावसेकनिर्हरणप्रयोजनतया सोमपात्रत्वा-
मित्यवगमाद्भूयः कस्यचिदपेक्षाभावादविवक्षितं ग्रहैकत्वमुपलक्षणमात्रं। अपि च। सोमयागस्यैकत्वात्तद-
दे पूर्वमप्येकमेव तत्साधननिवेशी च संमार्गश्चमसेष्वपि तत्साधनेषु न विलुमर्हति। न ह्यत्र कर्मभेदोऽस्ति येनापू-
र्वभेदादवघातादिवद्व्यवस्था स्यात्। तस्माच्चमसेष्वपि स्यादिति प्राप्ते निधीयते। न ह्ययं ग्रह विवक्षायां वाक्यभेदः
प्रसज्यते। यागैकत्वेप्यपूर्वानुविधायितस्यासंभेदतः॥१॥ न तावदेकत्वविवक्षावग्रहस्य विवक्षायां वाक्यभेदः
6 अवश्यं पदे संमार्गः कस्यचिद्विधातव्यः तत्र शब्दोपनीतं ग्रहमुल्लंघ्य न युक्तं यत्सामर्थ्यलभ्यं सोमपात्रमात्रं गृ- ह्य
ते। एकस्यापि च यागस्याभ्यासे भेदान्नैषां चापूर्वमंतरेण संहत्यकारित्वायोगादवश्यं प्रत्यभ्यासमपूर्वानि-
ग्रहेनैतत्स्वग्रहशब्दलक्षितापूर्वविशेषनिबंधनः संमार्गो न चमसेषु कर्त्तव्यः॥८॥ आनर्थक्यात्तदंगेषु॥ सप्तदशा-
रत्निर्वाजपेयस्य यूप इति श्रूयते। तत्र संशयः। किं सप्तदशारत्नित्वं वाजपेयसाधनोर्ध्वपात्रद्वारेण वाजपेयांगं। राम ६

उनस्यपद्वारेण पश्वंगमिति। तदर्थं च किं सप्तदशारत्निर्वाजपेयस्येति वचनव्यक्तिः। सप्तदशारत्निर्यूप
इति। तत्राव्यवहितत्वात्प्रधानत्वात्स करणानुग्रहात्व सप्तदशारत्निर्वाजपेयस्येति संबंधः। परिमाणं तु साक्षा
त्कर्मणि न संभवतीति तत्साधनभूतोर्ध्वपात्रद्वारेण संबध्यते। यूपशब्दश्चोर्ध्वपात्र एव साहश्याद्वर्तते। यद्वा
वाजपेयस्येति षष्ठ्या तत्संबंध्यूर्ध्वपात्रमुद्दिश्य सप्तदशारत्नित्वं विहितं तद्द्वारेण वाजपेयांगं भवति। एवं च वा
जपेयशब्दः क्रतौ वृत्तो भवति। यूपसंबंधे तु वाजपेयस्य यूपाभावात्पशुयागसंबंधित्वाद्यूपस्य वाजपेय
शब्दः पशुलक्षणार्थः स्यात्। नन्वित्र त्रापि यूपशब्दो गौणः सत्तु न दोषो जघन्यत्वाद्यूपशब्दस्य वाज
पेयशब्दस्य तु मुख्यत्वान्न लक्षणा युक्ता। तस्मादूर्ध्वपात्रे निवेशः स्यादेवं यदि यूपेन संबंधे लक्षणा भवेत्।
वाजपेयक्रतेर्नासौ क्रतिवृत्तेव सा यतः। १। षष्ठी संबंधमात्रार्थानांगं गिलमपेक्षते। नाप्यव्यवधि संबं
धं देवदत्तस्य नप्तृवत्। २। यूपस्य च पशुद्वारा वाजपेयोपकारतः। संबंधमात्रमस्त्येव क्रतुना तो न लक्ष
णा। ऊर्ध्वपात्रेण संबंधे यूपशब्दो गौणता। अनंतरेण संबंधः प्रधानेन च संगतिः। प्रक्रियानुग्रहश्चैवं
नाद्दृत्याश्रुतिबाधतः। तेन सप्तदशारत्निर्यूप इत्येव संगतिः। सा च प्रकरणाद्वाजपेयसंबंधियूपगा। ते
नायं वाजपेयस्येत्यनुवादो भविष्यति। ६। ॥ कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः स्यात्॥ दर्शपूर्णमा

स्य ३

राम
शास्त्र ०३

स्याः प्रयाजसमीपेश्रूयते। अग्निक्रामं जुहोतीति। तत्र नाप्यकारेण जुहोतेः सन्निहितप्रयाजविषय
त्वं सिद्धं तत्वात्किमग्निक्रमणं तेनैकवाक्यं सन्नकर्त्रा संबध्यते। किं वा ततो भिन्नं स कृत्स्नप्रकरणकर्त्रेति वि
चारितं। एवं च एकः पक्षः। क्रियया कारकस्यैव नान्यस्यात्सैकवाक्यता। नचाग्निक्रमणं प्रकृतिर्वर्ति तं का
रकं भवेत्॥१॥ न चारूण्यवत् द्रव्यद्वारेण संभवति। तत्रस्यैकहायिनी द्रव्यमुपात्तं युक्तं यत्द्वारतां प्रतिपद्यते॥
अत्र जुहोतिना कर्तुरनुपादानान्न द्वारत्वं। तस्माद्विभिन्नं प्रकरणेन गृह्यते शक्यते च क्रियायाः प्रकरणेन
गृहीतं प्रयाजादिवत्। संभवति कर्मणः कर्मेपि कारकत्वं कारकत्वं तु न संभवति। तस्माद्दर्शपूर्णमासांगंस
त्सामर्थ्यात्कर्तृसंस्कारकं भवति कर्त्ता च सर्वप्रयोगांगमिति सर्वप्रयोगे ग्निक्रमणस्येति। सिद्धांतस्तु॥ अ
नुपात्तोपि सद्भावमात्रेणद्वारतां व्रजेत्। कर्त्ताग्निक्रमणं तेन भवेद्धोमस्य साधनं॥१॥ वार्त्तिकारस्तु तां
तमग्निक्रमणं नक्रियातो न्येन संबध्यते तस्माज्जुहोति संबंधस्य स्पष्टत्वात्ततो न विच्छेदाशंकेत्यन्य
थाधिकरणं वर्णयांचकार। अग्निक्रामं जुहोतीति होमानुवादेन विधीयमानमग्निक्रमणं किं प्राकरणि
कसर्वहोमांगं। उत प्रयाजहोमस्यैवेति संशयः। तदर्थं किमवांतरप्रकरणमस्ति न वेति। फलवद्भावनोद्भू
तकथंभावतिरोहिताः। नैवांगानां कथंभावाः प्रादुःष्यंतितमंतरा॥ प्रादुःष्युर्यदि चांगानां कथंभा

धातुसंबंधेविधानात् ४

अर्थतः ५

७

7

तं बंधो ६
क

राम
२

वास्ततो मिथः। तेषां मंगांगितापत्तेरवस्था प्रसज्यते।२। न समान्नोत्तरप्रकरणं तदभावे च सन्निधिमात्रेण
तिक्रमणं प्रयाजांगं स्यात् सच दुर्बलः प्रकरणात्। अतो दर्शपूर्णमासनाव नया संबंधात्तदीयसकलहोमांगम
तिक्रमणं बर्हिर्धर्मवत्। नन्व सत्यपि अत्र वांतरप्र करणे वाक्येनैव प्रयाजांगता स्यात् अग्निकामं जुहोतीति।।
नैवं। जुहोतेः साधारणत्वेन प्रयाजोपस्थापनाभावात्। नन्वनुवादोयं सन्निहितगामी प्रयाजाश्च सन्निहिताः।
नैवं। बुद्धिविपरिवृत्तिरनुवादस्यापेक्षितानपाठप्रत्यासत्तिः तथा सत्यत्यंतसन्निहितोत्तमप्रयाजस्यैवातिक्र
मणमंगं स्यात् न समिदादीनां तथा बर्हिषि द्वर्व्यासादयति यस्यैव हविषः क्रियानपि पाठतः सन्निधिविशे
षोस्ति तस्यैव बर्हिष्यासादनं स्यात्। नान्वेषां बुद्धिविपरिवृत्तिश्च सर्वहोमानामविशिष्टा प्रकृतत्वादेवातो
बर्हिर्हविः शब्दस्येव जुहोतिशब्दस्यापि संकोचायोगात् सर्वहोमांगमतिक्रमणमिति। एवं देवं प्रयाजानां
नास्ति प्रकरणं यदि। तेषां वचनसंयुक्ताये गुणा विहिताः पुरा।१। पञ्चात्र ये विधास्यंते तैः संदष्टमिदं कृतं।
अग्निकामं जुहोतीति न ततोन्यत्र गच्छति।२। प्रयाजान्विधाय समानयत उपभृत इत्यादिगुणान्विधायाग्नि
कामं जुहोतीत्युक्तायो वै प्रयाजानां मिथुनं वेद समिधो वद्भिरिव प्रजातीत्यादि यावत्प्रयाजानिष्ट्वा हवींष्य
भिघारयतीति प्रयाजपरामर्शी दर्शानान्नूनमेतावता प्रदेशेन प्रयाजाः समाप्यंत इत्यवगमात्तन्मध्यपतितं

रि ४

प्रोतेभिधीयते ५

राम
शास्त्र०३

मत्क्रिमणे न तदतिक्रमेण । अन्यत्र गच्छति । विद्यते चांगभावना नाम अविज्ञातप्रकारत्वात् कथमित्याकां
क्षा । तथापि । न विद्यते तु संदंशो यत्र वाचनिके गुणे । तत्रांगानां कथं भावः सन्न् अपि विनियोजकः ॥१॥
निष्फलत्वे न सर्वेषां न विशेषोऽवगम्यते । कः शेषः कस्य शेषी इति न मतः सर्वप्रधानगा ॥२॥ अव्यवस्थाप्रसक्ति
श्चयोक्ता सैव निराकृता । संदंशे सति संदष्टं तदंगमितरत् पुनः ॥३॥ सर्वप्रधानगामीति नाव्यवस्थाप्रसज्य
ते । यस्मादसाधिकाराणामितिकर्तव्यतास्थिता ॥४॥ नान्येषामितस्यापि प्रतिज्ञामात्रमेव तत् । अवि
ज्ञातप्रकारत्वादन्ययेषां हि सा भवेत् ॥५॥ तान्यपि त्वनुष्ठेयानि चेन्न तदनुष्ठानमेव न स्यात् । एतावांस्तु वि
शेषो यदेषामन्यार्थमनुष्ठानं । साधिकाराणां तु स्वनिष्ठमिति । न चैतावतानेषामितिकर्तव्यतावत्वं तद्धि
[illegible] विशेषोऽन्यार्थस्याप्यविज्ञातप्रकारस्यानुष्ठानासंभवात् प्रयाजैरुपकृत्य कलाप्रधानस्योप
कुर्यादित्युक्ते यो नाम प्रयाजैरपूर्वं कर्तुं न जानाति तस्य न वत्येवं कथममीभिरपूर्वं कर्तव्यमिति प्रकार
विशेषापेक्षा । सत्यामपि तस्यां संदंशपतितं यद्यंगं न स्यात्ततोऽविशेषात्सर्वफलवदंगं स्यात् । प्रकारा
कांक्षा तु वाचनिके गुणे रर्थापत्तिलभ्येन च स्वरूपनिष्पादनेनाचमनादिभिश्च दर्विहोमवत् पूर्यते । अ
भिक्रमणं तु संदंशपतितत्वादवांतरप्रकरणोत्थैः प्रयाजांगं । एकदेशिनां तु अवांतरप्रकरणाभावात्

८
8

राम
८

ततः२ न्२

न्निधिवाधेन प्रकरणाविशेषात्सर्वार्थे स्यादित्याशंक्यां तावत्।१०। संदिग्धे तु व्यवायाद्वाक्यभेदः स्यात्। दर्शपू
र्णमासयोः सामिधेनीर्विधाय तत्र सांचत्रिः प्रथमामन्वाहेत्यादिवचनैर्गुणान् विधाय ततो निविदो नाम मंत्रा देवेद्धो मन्वि
द्ध इत्यादयो विहिताः काम्याः सामिधेनीकल्पा विहिताः तदनंतरं यज्ञोपवीतमाम्नातं। उपव्ययते देवलक्ष्ममेव तत्
कुरुत इति। ततः पुनरपि च सामिधेनीनामेव वाचनिका गुणा विधीयंते अंतरान् व्यंस देवत्यायेत्यादयः। त
त्रोपवीतं प्रति संशयः। सामिधेन्यंगमुत दर्शपूर्णमासांगमिति। दर्थं च किं सामिधेनीनां वाचनिकगुणोद्ध न५
त मवांतरप्रकरणमुपवीतविधावनुवर्त्तते ऽथवाविच्छिन्नमिदं निविद्भिरिति। अनुवृत्तोत दंगत्वं विच्छि
न्ते दर्शः षें षता। किं प्राप्तमुत यत्रापि कीर्त्तनादनुवर्त्तते।१। पुरस्तादुपवीतस्य परस्ताच्चापि कीर्त्तनं। विद्यते सा
मिधेनी नामतः प्रकरणास्थिता।२। निविदस्तु हर्षानुमंत्राणां मंत्रवत्स्वप्रे रकरणपठिता इत्यवगंतव्यं। अथवा।
निविन्नामपि तादर्थ्येतत्कथं भावसंगतेः। न चांगैर्व्यवधीयंते प्रधानानि कथंचन। काम्येष्ट्याश्रयत्वेन तत
सामर्थ्येनुवर्त्तनं। उपवीतमन्तस्तासामंगं प्रकरणाद्भवेत्।२। एवं प्राप्ते वदामोऽत्र निविद्भिर्व्यवधानतः। विवि
ना सामिधेनीनां प्राप्तिर्या नानुवर्त्तते।३। यस्क सन्निधानस्यैवासंबंधिभिः पदैर्व्यवधानं न प्रकरणस्येति
मन्यते। तस्य सर्वप्रकरणानुवृत्तेः सर्वे धर्माः सर्वेषामुपदेशेनैव स्युः॥ अतो विष्यति दादीनामपि कलर्थं

कैर्मणां सर्व

तर्म१

त्वं स्यात्। यत्तु निविदामप्यवांतरप्रकरणे न सामिधेन्यंगत्वादव्यवधायकत्वमित्युक्तं। तदप्ययुक्तं। लिंगेन
हि प्रकरणं बाधित्वा निविदोऽग्निसमिंधनांगं भवंति न चाग्निः सामिधेन्यंगं भवति येन तद्द्वारेण निविदोऽपि
तदंगं स्युः। किंतु सामिधेन्य एवाग्न्यंगं निविदोऽपि। न तासां मिथः संबंधः यथा वक्ष्यति गुणानां च परार्थत्वा
दसंबंध इति। तेनासंबंधित्वान्निवित्यदे दर्शपूर्णमासांगैर्विच्छिन्नं सामिधेनीनां प्रकरणं नोपवीतं गृह्णा
६ ति। नन्वेवं निविदंगमुपवीतं स्यात्। न तासां प्रकरणमस्ति। श्रुतितः कीर्तनाभावात् सन्निधिमात्रमपि नास्ति।
काम्येष्ट्यव्यवधानात्। तर्हि काम्यानामंगं स्यात् अव्यवधानात्फलावच्छेदेन च प्रकरणसद्भावात्। न। तेषां
विकृतित्वम् बोधयादयति ७ विकृतित्वात्। इह हि न नित्यसामिधेन्याश्रयतो न गुणमात्रं फलाय विधीयते। विच्छिन्नप्रक्रियाणां तासा प्रकरणो६
माश्रयत्वानुपपत्तेः। वाक्येन चाश्रयसंबंधो वाक्यभेदात्। किं तु वचनांतरेण संख्याविशिष्टानि फले विधीय
ते। तानि च संख्यायुक्तान्यनुवचनत्वसामान्यान्नित्यानुवचनप्रकृतीनि। ततश्चैतासामश्चामन्येषां च तद्धर्माणां
१ प्राप्तिः। अनुशब्देन च यस्त्वन्नमः प्रवक्त्र इति निगदानंतरभावः सामिधेन्यंगत्वेनोक्तः सोऽप्यत्रातिदिश्यते।
स च निगदः क्रतुप्रयुक्तत्वान्न बहिः प्रयोगं लप्स्यते। तद्देशेनानुवचनांतराणामपि क्रतुमध्यप्रयोगसिद्धिः।
एतेरेव चाग्निसमिंधनस्य प्रसंगात्सिद्धेर्नित्यानुवचननिवृत्तिः। तेनैतेषामनुवचनानां कृतोपकारप्रा
कृतधर्मपरि[illegible]तानां कथं नावापेक्षाभावान्नास्ति प्रकरणं पाठसंनिधानमात्रं तु स्यात्तच्च दुर्बलं प्रकर राम ६

तस्त ३

तिस्रः साह्नस्योपसदो द्वादशाहीनस्य १

त२ च१ पर२

णादिति दर्शपूर्णमासाङ्गमेवोपवीतं [illegible] तु पश्चात्तन्नागुणास्ते दूरस्थानुवादे नैव द्वादशोपसत्त्ववद्विधानं शक्या
दिति न तद्दूरे शेनैकान्ततः प्रकरणानुवृत्तिर्विज्ञायते यतः प्रकरणे पाठो निविदां स्यात्। यद्वा तिष्ठन्नन्वाहीतरान्नू
च्यमित्यादिष्वनुवचनमात्रं श्रूयते तत्र यदि सामिधेन्यनुवचनं प्रकृतं स्यात्ततस्तदेवगम्येत तदभावात्त्वनुवचनमा
त्रमनुवाक्यादिसाधारणमिति न सामिधेन्यनुवृत्तिरवधार्यते। यदपि देवा वै सामिधेनीरनूच्येत्यन्तेन वचनं तद
प्याधारार्थवादत्वान्न सामिधेन्यनुवृत्तिं सूचयति। तस्माद्दर्शपूर्णमासाङ्गमुपवीतं। एकदेशिनां त्वन्तरेण प्रकरणम्
त६ नावाक्यसन्निधेश्च प्रकरणाद्दुर्बलत्वादसत्यपि विच्छेदे सामिधेनीनां दर्शपूर्णमासाङ्गत्वमुपवीतस्य सिध्यतीति व्य
र्थमिदमधिकरणं स्यात्। कश्चित्त्वाह। उपव्ययत इत्येकं पदं अन्विताभिधानाय कर्त्तारमपेक्षमाणं सन्निहितेन कार्यान्विते शक्तिः १
सामिधेनी६ कर्त्रान्वीयत इति। तदयुक्तं। प्रत्ययार्थेनापूर्वेणाधातोरन्विताभिधानसिद्धेरवश्यंभावानेन प्रत्ययेन सत्त्वपि सामि
धेनीनां सन्निधानेऽधिकारापूर्वमेवाभिधातव्यं। सामिधेनीनां सान्निपातित्वेनापूर्वशून्यत्वात्। अतः पदश्रु
त्यैव तदङ्गमुपवीतं भवतीति किमर्थमिदमधिकरणं। अपि चैवं पूर्वाधिकरणस्य पूर्वपक्षेऽपि विच्छिन्नमप्यक्रि
क्रमणमेकपदत्वात्सन्निहितेनैव प्रयाजकर्त्रा [illegible] न्वीयत इति तदधिकरणवैयर्थ्यं स्यात्। न च वि
नामभिरित्यस्यानाख्यातत्वात्सिद्धवस्तुनीतेर्न कर्त्राकांक्षा किन्तु शेषिभूतस्तत्र कर्त्तापेक्षितो न च शेषिणान्विता
भिधानमिति। मैवं। अवघातादिषु शेषिणापि अन्विताभिधानाभ्युपगमात्। अपि च सर्वत्रैव कार्यार्थानिप

दानिकार्येणशेषिणान्वितमर्थमभिदधतीति यत्किंचिदेतत्। अपि च यदि न शेषिणान्विताभिधानं केन तर्ह्यन्वित
मभिक्रमणमभिधातव्यं नत्वनन्वितस्याभिधानं संभवति गुणभूतस्य कर्त्रा निरपेक्षितत्वान्न तेनान्विताभिधानं
संभवतीति त्वयोक्तं। संभवे वा सन्निहितेनैव प्रयाजकर्त्रान्विताभिधानाद्व्यर्थमेकवाक्यत्वप्रतिपादनं। प्रधान
विधिनाभिक्रमणमन्वितमभिधीयत इति चेत् न तस्यापि शेषित्वात्तदुपवीतस्यापि तत्संभवात् न सन्निहितेना
 पि सामिधेनीकर्त्रान्वयः स्यात्। अथानभिहितमभिक्रमणं ग्राहकोऽगृह्णीयादुपवीतमपि गृह्णीयात्। यद
पि शेषिभूतः कर्त्रापेक्षितो नानुष्ठातृभूत इति तदपि विपरीतं अविहितस्य शेषापेक्षाभावात्। कर्त्रपेक्षा
तु क्रियास्वाभाव्यादेवस्यादित्युक्तं तावत्॥११॥ ॥गुणानां च परार्थत्वादसंबंधः समत्वात्स्यात्॥ आधानप्र
करणे वारणवैकंकतानि यज्ञसंयुक्तानि पात्राणि श्रूयंते वारणो यज्ञावचरो वैकंकतो यज्ञावचर इति पव
 मानेष्टयो ह्याधानप्रकरण एव प्रदेशांतरे श्रुताः। तत्र पात्रेषु संदेहः किं पवमानेष्ट्यंगमुत यज्ञमात्रांगमिति।
तदर्थं च किं पवमानहविष्पाधानांगमुत तान्यप्याधानेन नम(?)प्रधानान्यगत्यर्थानीति। यद्यंगं ततो यज्ञसंब
धात्साक्षादाधानेऽसंभवंत्यपि पात्राण्यानर्थक्यतदंगन्यायेन पवमानेष्टिषु भवंति। अनंगत्वे तु कथंचिदपि
यज्ञसंयुक्तानां प्रकृताधाननिवेशासंभवादिष्टीनां च स्वविषयमप्रकृतत्वादनारभ्यवादरूपेण सर्वयज्ञेषु सं
भवंति। तत्राधानस्य द्वितीयासंयुक्ताग्निसंस्कारार्थनयाफलवलादफलानि पवमानहविषि प्रकरणात्तदं

इष्टिप्रकरणान्नेतरगंतसात २

गंभ्रात्रोच्यते। यदाहवनीये जुहोतीति वाक्यादेषा मे ऽर्थता। नन्वनारभ्यवादोयं सर्वहोमांगमाहवनीयं विधे
येन लाहवनीयांगत्वं पवमानहविषां। अत्र कश्चिदाह। अनारभ्यवादेन प्रकृतावाहवनीयोंगत्वेन विहितः पवमा
नेष्टिष्वतिदेशेन प्राप्तः सच पवमानहविर्वेलायामनिष्पन्नत्वान्नांगं संभवतीत्यंगत्वे निवृत्ते यस्तस्य प्रकृतो द
ष्टः साक्षात्संबंधांशः स दृह संबं बाधनीयः। अवश्यं च पवमानहविषां आधानांगत्ववादिनापि अग्निनि
ष्पादनमुपगंतव्यं तत्र च कृत साक्षात्संबंधावाधाय साक्षादेवास्तु किमाधानप्रणाड्या समाश्रीयत इति सि
द्धमग्न्यर्थत्वं। तदिदमसारं। यत्तावदुक्तमंगत्वं निवृत्तमिति तत् स्वसिद्धांतप्रस्मरणात्। नहि चोदकावगतमं
गत्वं निवर्त्तते। यद्यपि वा निष्पन्नत्वान्न साधयति तथाप्यसाधयत एवांगत्वमवघातस्येव कृष्णल चरावव
तिष्ठते तेन न साक्षात्संबंधः स्यात्। गत्वे नैव प्रकृतिवदुपपन्नत्वान्न तत्सिध्यर्थं तत्साध्यत्वमंगीकर्त्तव्यं। अपि
चार्थिकः प्रकृतौ साक्षात्संबंधोंगत्वमेव शास्त्रार्थः। न चार्थिकं चोदकः प्रतिदिशति यद्बले न साध्यता स्यात्। अ
तिदिश्यतां वा संबंधः स तु येन केनापि प्रकारेण सिध्यतीति साध्यत्वविशेषः कुतो लभ्यते। यत्तु साध्यत्वमा
धानांगत्ववादिनाप्युपेयमिति सत्यमुपेयं अस्ति हि तस्य प्रकरणं प्रमाणं भवतस्तु किं प्रमाणं प्रकरण
मेवेति चेत् तथा सत्याधानांगत्वद्वारेणैवाग्नीनां साध्यत्वं स्यात्। यदि त्वविशेषितं साध्यं प्रकरण

राम

त्सिध्येततोति देशावशेन साक्षात्तदित्याम्नी येतं कृत्वर्थत्वमेव तु प्रकरणादवगम्यते। नाविशिष्टं साध्य
त्वं तेन यदि प्रकरणमंगीक्रीयेताधानांगत्वं न स्यात् न चेत्साध्यत्वमेव न स्यात् विश्वजिदादिवत्तु फलं क
ल्पयित्वाग्नीनामंगत्वमेव स्यात्। अस्तु वा तिदेशावगतसाक्षात्संबंधवत्त्वेनैव साध्यत्वं तत्तु उपदेशा
त्मकप्रकरणावगतक्रत्वर्थत्वविरोधाद्बाधितव्यं। अपि च करणत्वेपोष्टीनां न भवति साक्षाद्दिष्टि साध्यत्व
मग्नीनां। ताहि सकलप्राकृतांगाहितोपकारसचिवा अग्नीन्साधयंति। तेनैव सर्वांगानुष्ठानावस्थित मुख्यत्य आ ५
११ पूर्वद्वारभूतमंगीकार्यं तत्प्रणाड्याग्नीनां साध्यत्वं न साक्षात्। अपि च न प्रकृतावाहवनीयस्य साक्षा
त्संबंधः अंगभूतेन प्रक्षेपेणाहवनीयस्य संबंधो न साक्षाद्यागेन तदिहापि प्रकृतिवदतिदेशात्प्रणा
ड्यैव संबंधः स्यात्। तस्मान्नैव मग्न्यर्थता सिध्यतीत्यन्यदुत्तरं वाच्यं तदुच्यते। अयमत्रिशायोन्नाव्यका
रस्य अनारभ्यविधानेन सत्यं नान्यार्थता भवेत्। तत्तु त्वं वाक्यमस्य न्याय व माने हि संनिधौ ॥१॥ त्य ६
तेन चाग्नेरनिष्पन्नस्यैव सान्निध्ये नूधानासंभवात्तस्यैव निष्पादयितव्यस्य फलवतः साधनत्वेनाफला
आधान नि पवमानहवींषि विधीयंते स संनिधिलक्षणया साध्यत्वमेव प्रतिपादयतितमेपयासिद्ध्यानयती
वत् २ तिवत्। तस्माद्वाक्येनाधानवत्पवमानहविषामग्न्यर्थत्वेप्यात्राणावाक्येन सर्वयज्ञार्थता सिध्यतीति राम
x त्वान्नेधानांगत्वं। अतः सर्वयज्ञार्थानि पात्राणीति त्रिभ्यानार्यस्त्व असत्य पविमानहविषामग्न्यर्थ x १ ९१
प

ध ३ वि३

वाक्य[illegible]यकल्पनाक्लेशं न मम स्वेव व्रीहीनवहंतीत्यादिषु यथाश्रुतव्रीहिमात्रार्थत्वेवघातस्यानर्थक्या
द्युक्तः प्रकरणानुप्रवेशः तद्दर्शने च व्रीहिशब्दस्य साधारणरूपलक्षणाश्रयणं तु यथाश्रुतयज्ञार्थ
त्वे पि दीक्षणीयार्थस्येव वा द्वि[illegible]यम स्यानर्थक्याभावान्न लक्षणाश्रयणेन प्रकरणानुप्रवेशकल्पनान्या
य्या यदि पवमानेष्टिसन्निधौ पात्राणि यज्ञार्थानि श्रूयेरन् ततो नुवादस्य सति [illegible] संभवे सन्निहितगा
मित्वात्स[illegible]स्य दशारत्नित्वमिव वाजपेयस्य प्रकृतिवच्छब्दसन्निधापिते यूपे रुक्मलहोमवद्यसो र्थस्य
प्रकृतिवच्छब्दसन्निधापितेष्वपयाजेषु पवमानेष्वनुवादेन विधानात्तात्स्वेव पात्राणि स्युः ननु तासामि
ह सन्निधानमस्तीति स्मात्सकरणात्तत्रषानुमंत्रणवदुल्हेष्टा। निपात्राणि सर्वार्थानीति नार्थ्याधिकरणेन। स्त्र
त्रं तु पूर्वाधिकरणएव पदोत्तरत्वेन व्याख्येयं। निविद्विर्वावाया सामिधेनीवाक्यस्योपवीतवाक्यस्य च ले
दं स्यादित्युक्ते ननु निविदां सामिधेन्यंगत्वादव्यवधायकत्वं स्यादिति येवदंतितेषामुत्तरं गुणानां च परार्थ
त्वादिति निविदो पि लिंगेनाग्निसमिंधने गुणभूताः सामिधेन्यो पि अतो न तासां मिथः संबंधः॥१२॥ मिथश्चा
नर्थसंबंधः॥ दर्शपूर्णमासयोराग्नेयः सोमपक्षा उपांशुयाजो विहितो तयोः क्रमे नुवाक्याचतुष्टयमाम्नातं आ
ग्नेयी सौमी चेत्येकं युगलं पुनराग्नेयी सौमी चेत्यपरं तत्र प्रथमाद्वितीयेवा[illegible]र्द्वितीया चतुर्थी च दध

शा का ५

न्वलौ। तत्रापरं वचनं वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वती अमावास्यायामिति तत्र संशयः। किमाज्यभा
गयोः क्रमप्राप्तौ मंत्रावेताभ्यामाश्लिष्य वचनेन प्रधानांगतया विधीयेते उत आज्यभागयोरेवाव्यवस्थया
प्राप्तयोर्युगलयोर्व्यवस्थामात्रमिति। तदर्थं चास्मिन्वचने पौर्णमास्यमावास्याशब्दौ कर्मवचनावुत काल पं ३
वचनाविति। तत्र कालस्यासमर्पणीयत्वान्न मंत्रेणाप्रयोजनं। नापि प्रकरणां तस्य तेनेन नासा विहोच्यते।१।
कर्मणः प्रकृतत्वेन मंत्रापेक्षतया च। तत्पौर्णमास्यमावास्याशब्दाभ्यामभिधीयते।२। सप्तमी चरूर्वे
वैदिककेरी द्युरमावास्यायां तिवत्प्रधानेप्यविरुद्धा तस्माद्वाक्येन क्रमं बाधित्वा प्रधानार्थौ मंत्राविति। नैवं। यद्य
ती६ पिकर्मैव शब्दाभ्यां प्रतिपाद्यते। तथापि सप्तमीश्रुत्या न प्रधानत्वसंभवः।१। एर्वेद्युरमावास्यायामिति ल
क्षणा। न चेह तथा। मुख्यार्थसंभवात्। न चेदं सोमस्य मंत्रे प्रधानेषु सामर्थ्यमस्ति सोमस्य प्रधाने दे स्यध
वतायाअसंभवात् अग्नीषोमीयेप्यग्निसहितस्य देवतात्वं न केवलस्य। अमावास्यायां तु नास्त्येव सो
१.२ मः नचवचनादयथार्थत्वं लिंगं हि वाक्याद्बलीयः वाक्याद्धि कर्मणः प्रधानत्व लक्षणाश्रयणात्।
अथापि विधिवाक्यबलान्मंत्रपरिबाधोत्तयद्य बाधेन नोपपद्यते तन्नु व्यवस्थामात्रमपेक्षितमल्पं च विद
12 धत्सु तरामबाधेनैव वर्त्तेते पौर्णमासीगतयोराज्यभागयोर्वार्त्रघ्नौ अमावास्यागतयोर्वृधन्वन्ताविति
ति। यद्वा कालद्वारेण कर्मणि शब्दप्रवृत्तेः काले मुख्य इति तद्वारेण व्यवस्था विधीयत इत्याज्यभा राम १२

गयोरेव मंत्राः ॥१३॥ आनंतर्यमचोदना ॥ दर्शपूर्णमासयोराम्नायते । हस्ताववनेनिक्ते उलपराजिं स्तृ
णातीति । तथा ज्योतिष्टोमे मुष्टीकरोति वाचं यच्छति दीक्षितमावेदयतीति । हस्तावनेजनं हस्तसंस्कारा
र्थं मुष्टीकरणं वाङ्नियमनं च मनःप्रणिधानार्थं तेन तत्त्रयमपि लिंगात् करिष्यमाणकर्मांगं सत्किमनंतर
योरुलपराजिस्तरणदीक्षितावेदनयोरंगं । उत सर्वांगमिति संशयः । तत्रानंतर्यादिकवाक्यत्वादवांतरप्र
करणाच्चातन्मात्रांगत्वे प्राप्ते सिध्यते । लिंगप्रकरणाभ्यां हि सर्वार्थत्वं प्रतीयते । क्रमस्य दुर्बलत्वात्ताभ्यामतः
सर्वार्थता न नेत् ॥१॥ नचाख्यातद्वयस्य यच्छब्दाद्युप बंधरहितस्यैकवाक्यत्वं संभवति येन वाक्येनैवता
दर्थ्यं स्यात् । न चक्रत्वादि विहितांगसंदंशोस्ति । येनावांतरप्रकरणं स्यात् । तस्मात्सर्वार्थता स्यात् ॥
शेषस्तु गुणसंयुक्तः साधारणः प्रतीयेत मिथस्तेषामसंबंधात् ॥ दर्शपूर्णमासयोराग्नेयाग्नीषो
मीयैंद्राग्नाः पुरोडाशाः तत्राग्नेयं चतुर्धा करोतीति चतुर्धाकरणं किं सर्वेषां । उताग्नेयस्यैवेति भवति वि
चारः । तत्र आग्नेः संबंधमात्रेण नवे द्रव्योपलक्षणं संबंधस्याविशिष्टतः सर्वेषामुपलक्षणं ॥१॥ आग्नेयस्था
वत्त्र चतुर्धाकरणविषयद्रव्योपलक्षणमात्रं न स्वयं कर्मयोगीति नासौ यथाश्रुतएव ग्रहीतव्यः येन देव
तालभ्यते नैवोपलक्षणं स्यात् किंतु यावता विना न शक्नोति द्रव्यं लक्षयितुं तन्मात्रमादर्तव्यं संबंध
मात्रेण चासौ शक्नोति तल्लक्षयितुं संबंधश्चाग्नेरग्नीषोमीयेपि । तस्मात्तस्याग्नेयशब्देन लक्षितत्वात्तस्या

चतुर्धाकरणं॥ अथवा देवतात्वमेवास्ति यद्धि द्वाभ्यां दीयत एवं न देकस्मा अपि। यद्वाग्नेरिदमिति संबंधमा
त्रे प्याग्नेयशब्दो भवत्येव सर्वत्राग्निकलिभ्यां कूवक्रव्यदृतिस्मरणात्। तस्मात्सर्वत्र चतुर्धाकरणमिति प्राप्ते ब्रूमः।
देवतात्वाद्देवतावाचीनद्धितो ग्नेः समुच्चरन्। नान्ययुक्ताग्निदेवत्यं प्रतिपादयितुं क्षमः।१। देवताभ्रन्तस्तावद्धिहा
द्रव्यपरिच्छेदन चं नि[illegible]स्तद्धितेनोपलक्षणमुपादीयते। संभवति च तस्य यथाश्रूयेवोपलक्षणत्वं केवलाग्नेयस्यापि सं
द्भावात्। अतो न शब्दानवगतेन संबंधमात्रेणोपलक्षणत्वं युक्तं विना कारणेनश्रुतबाधप्रसंगात्। अग्नी[illegible]
मीयादौ तु समासादुत्पन्नस्तद्धितो द्वयोः सापेक्षयोर्देवतात्वमाहते न तत्रान्यसापेक्षस्याग्नेर्देवतात्वं न च
सापेक्षस्य तद्धिते सामर्थ्यमस्तीति नाग्नेयशब्दो न शक्नोत्यग्नीषोमीयादिकमभि[illegible]वदितुं। यद्यपि च संबंधमात्रे
विरूढस्तद्धितस्तथाप्यत्र देवतार्थ एवाश्रयितव्यो लक्षणार्थत्वात्। प्रसिद्धसंबंधं हि लक्षणं भवति। प्र
१३ सिद्धिश्च विधिवाक्यादेवावगम्या विधिवाक्ये चाग्नेर्देवतासंबंध एव पुरोडाशेनावगतो न संबंधमात्रं तस्मा
द्देवतात्वमेवोपलक्षणं तच्चाग्नीषोमीयादौ नास्तीत्याग्नेयस्यैव चतुर्धाकरणं। यद्यपि शतपथब्राह्मणे तं च
13 तुर्धाकृत्वा पुरोडाशं बर्हिषदं करोतीति सामान्यवचनं तदप्यनेनैव वचनेनोपसंह्रियत इति तस्यैव चतुर्धाक
रणं युक्तमिति।१५। ॥ इति श्री शास्त्रदीपिकायां तृतीयस्य प्रथमः पादः॥ ॥ अर्थाभिधानसंयोगान्मंत्रेषु शेषभावः

शेष १ २३

६ X त्वविशेषादुभयत्रवाचकत्वं कस्मान्न भवति· नाविशेषः विशेषप्रतीतिः अ
ग्निरिवमाणवक इति सादृश्यप्रत्ययानुणादेवचप्रयोगप्रती X ६

स्यात्तस्मादुत्पत्तिसंबंधार्थेन नित्यसंयोगात्॥ सर्वपादेष्कृतिविनियोगः प्राधान्येन चिंतितः अधुना लिंगवि
नियोगश्चिंत्यते। विनियोजकत्वं लिंगस्य मंत्राधिकरणे सिद्धमर्थप्रकाशनेनोपकुर्वतीत्युपिधानात् तद्विशेषस्त्वि
दानीं चिंत्यते। लिंगं सामर्थ्यं तच्च मुख्यइव गौणेपि च कथंचिद्दृश्यते। तदिह संशयः। किं मुख्य वार्थं मंत्राणां विनि ५ २
योगः किंवा गौणेपीति। कः पुनर्मुख्यः को वा गौणः। यः शब्दादेवावगम्यते स मुख्यः यथाऽग्निशब्दाज्ज्वलनः।
दे यं. प बर्हिःशब्दाच्च कुश । यस्तु शब्दाभिहितार्थगुणसंबंधात्तत्सदृशोर्थः प्रतीयते स गौणः यथाऽग्निशब्दा
व६ न्माणव कं संहितज्वलनपैंगल्यादिगुणयोगात्प्रतीयते तथा बर्हिःशब्देन तृणांतरमुलपादि। ननु प्रयोगप्रतीत्युपप
न्यायां ९ त्तेरनेकार्थत्वम । परगुणः परत्र न संभवतीति चेन्न। प्रत्यभिज्ञानात् यपि प्रतिद्ध्यं गुणजे दमातिष्ठते ते विसा
मान्यात्मनेकमभिच्छत्येवतेनोपपन्नो गौणमुख्यविभाग इति युक्ता चिंता। तत्र। अर्थानां स्मरणार्थत्वान्मंत्रा
णां चापि शक्तितः। प्रतिप्रधानमावृत्ते गुणानामनुमयार्थता॥१॥ उभयेषामपि तावदर्थानामनुष्ठेयत्वात्स्म
रणमपेक्षितं मंत्राणां चार्थं प्रति गुणभूताः समर्थाश्चोभयत्रापि यथा कथंचित्स्मरति माधातुं साक्षादभिधा
नस्यापि स्मरणमेव फलं नाधिकं तच्च गौणसामर्थ्यस्याप्यविशिष्टं प्रतिप्रधानं गुणावृत्तिर्न्याय्या तत् च २
स्मादुभयत्र विनियोग इति प्राप्ते विधीयते। गौणे सदपि सामर्थ्यं न प्रमाणांतरांद्विना। आविर्भवति मुख्य
तु शब्दादेवाविर्भवति तत्॥१॥ तात्पर्यं तु स्वतो मुख्ये गौणार्थे परतः पुनः। प्रमाणांतरविज्ञेयात् तदभावान्न सिध्य

ति।२। न यद्यग्निरित्येतावता प्रमाणांतरमंतरेण गौणे सामर्थ्यं तात्पर्यं वा कथंचिदपि लौकिकाः प्रतिपद्यंते।
मुख्ये तु श्रवणादेव शब्दस्यो प्रयमवगच्छंति न चेह प्रमाणांतरमस्ति येन मंत्राणां गौणे सामर्थ्यं तात्पर्यं
वा निश्चीयते। न चानाविर्भूते सामर्थ्यतात्पर्ये च शब्दार्थः प्रतीयते। न गौणोर्थो मंत्रान्न प्रतीयत एव कथ
मप्रतीयमाने विनियोगः मुख्यस्त्वर्थः शब्दादेवावगम्यत इति युक्तस्तत्र विनियोगः यस्य तु मुख्योर्थः त्र ४
प्रकरणे नास्ति तस्योत्कर्षः यथा पूषाद्यनुमंत्रणीयस्य तूत्कर्षो न संभवति तस्य तत्प्रमात्रेणोपयोगः
न तु गौणत्वमप्रमाणकत्वात् अपि च प्रथमावगतमुख्यविनियोगेनैव कृतार्थत्वान्मंत्रस्य न तद्वशेन
गौणे विनियोगः अर्थापत्तिगौणाध्यानाद्वादाभिधानेन विस्मरति सिद्धेनीलाभिधायिनं मंत्रमपेक्षते
मुख्य५ अतो प्रमाणकस्तत्र विनियोगः विनियोगस्तु मंत्राकांक्षावशाद्भवतीति तत्रैव विनियोगः।१। वव न्य ५
नात्वयथार्थमैंद्रीस्यात्॥ अपवाद आरभ्यते। अग्नेः श्रूयते निवेशनः संगमनो वसूनामित्यैंद्र्या गार्हपत्यमु
पतिष्ठते इति। तत्र संशयः किमनेन मुख्यस्येंद्रस्य प्रकाशनं कर्तव्यमुत गौणस्य गार्हपत्यस्येति। तत्र।
२४ पूर्वाधिकरणन्यायान्मुख्यस्येति प्रतीयते। विनियोगस्यानुसरणविनियोगस्तु वर्णते।१। न खल्विंद्रा
भिधानस्य मंत्रस्याग्निप्रकाशने शक्तिरस्ति न चार्थमैंद्रीकार्यार्थं विनियुज्यते।२। तेन मंत्रानुसारेण विनि राम २४

14

पदेन १

योगार्थवर्णना। इंद्रो हि गार्हपत्येन गौण्या वृत्त्याभिधीयते।३। यज्ञसाधनसाधर्म्याद्यद्वा गृहपतेर्यतः।
तेनायं गार्हपत्यः स्यादिंद्रो वयवयोगतः।४। द्वितीया वा समभ्यर्थं लक्षयति गार्हपत्य स्थित्वोपतिष्ठत
इति। यद्वोपतिष्ठतइति हि क्रिया विधीयते समीपस्थानं मात्मनेपदादनुमितं वाभिधानं तत्रेंद्रमंत्रकरणकोभि ऐंद्र्या गार्हप करणे २
धाने गार्हपत्यस्य कर्मत्वं न संभवतीति समीपस्थानविशेषणं गार्हपत्यो भवति गार्हपत्यमुपेत्याभि
धानेति प्राप्ते विधीयते। अग्नेरुक्तवचनसामर्थ्याद्विनियोगः
पत्र इति तस्मान्मुख्य एव विनियोगो न्याय्य इति प्राप्ते। यत्र मानांतरं नास्ति तत्र गौणो न गम्यते। प्र
प्रतीयते। न चात्यंतासमर्थत्वं गौणसामर्थ्यसंभवात्।१। यत्र मानांतरं नास्ति तत्र गौणो न गम्यते। प्र
माणांतरसद्भावे गौणे शब्दः प्रवर्त्तते।२। पूर्वाधिकरणोप्येतद्दर्शितं विध्यंतेत्र च। विस्पष्टं वचनं ते
न गार्हपत्यार्थता स्फुटा।३। अवश्यं कल्पनीयं हि मंत्रस्य ब्राह्मणस्य वा। गौणत्वं तत्र मंत्रस्य प्रा ध्या ४
र्थस्यैव ... ते।४। अ... प्राप्तौ विधौ नैव गौणत्वमुपपत्तिमत्। न चावयवयोगेन वृत्ती रूढ्याग्निवेदनात्।
।५। अभिधानक्रियायाश्च प्रधानत्वात्तदन्वयः। गार्हपत्यस्य नान्यार्थ समीपास्थितिगामिता।६। तदिह
सुज्य ५
स्ति गार्हपत्ये विनियोग इति स्थितं। सति चतस्मिन् लिंगादिंद्रार्थतापि भवतिनेति बलाबलाधिक
रणे चिंतयिष्यते।२। तथा कानमपीति चेत्। दर्शपूर्णमासयोराम्नायते। हविष्कृदेहीति त्रिरवघ्न

ध्या १ लक्षणाहेत्वोः क्रियायाः १

ध्या ५

राम

न्ना[illegible]ह्वयतीति। तत्र संशयः किमयं हविष्कृदेहीति मंत्रप्रयोगो ऽवघाते प्रयोक्तव्यः किं वा मुख्ये हविष्कृदाह्वा
नइति। तदर्थमिदं विचार्यते। किमस्मिन्वचनेऽवघ्नन्नित्यवघातमुद्दिश्य मंत्रो विधीयते हविष्कृदेहीत्यवघ्न
न्निति किं वा मंत्रस्याह्वाने [illegible] नसंबंधो हंतिस्तत्काललक्षणार्थो हविष्कृदेहीति त्रिर
ह्वयत्यवघातकाल इति। तत्र हरिवीधिकरणन्यायाद्विधौ युक्ता न लक्षणा। मंत्रस्य तु यथार्थत्वं च गौणी ४
नान्नैव दुष्यति। १। त्रिरिति तर्हि कथं विधीयत इति चेन्न। प्राप्तावघातोद्देशेन मंत्रस्य त्रिरभ्यासस्य
च विधौ वाक्यभेदात्। पाठप्राप्तानुवादत्वाददोषः मंत्रसमाम्नाये हि मंत्रं त्रिरभ्यस्तमेव केचिदामनंति।
आह्वयति रथि रहीति शब्दोच्चारणसामर्थ्या[illegible]ह्वानाः तस्मादवघातांगं मंत्र इति प्राप्ते विधीयते। त्रिरभ्या
१५ सो न पाठेन नित्यप्राप्तो यतः क्वचित्। द्विः पठ्यते सहस्राप्ति तस्मान्नायमनूद्यते। १। न पाक्षिकानुवाद
[illegible]त्वं नित्यान्वयविरोधतः। तस्मादत्र त्रिरभ्यासो विधातव्यस्तथा सति। २। मंत्रस्य न विधिः शक्यो वाक्य
15 भेदप्रसंगतः। आह्वानेन तु मंत्रस्य योगो हंति स्तत्काललक्षणा। ३। न चैवमप्याह्वानमनूद्य त्रिरभ्यासो हंतिका
लश्च विधीयत इति वाक्यभेदः स्यात्। न अर्थप्राप्तत्वात् अवघातकाल एव सह्वायाह्वानमर्थप्राप्तं अतो
नुवादमात्रमत्रावहंतिरनुवादत्वादेव लक्षणापि न दोषः तत्रापि चाविविशिष्टं ब्राह्मणे जघन्यपठितम्। राम

पं १ पं २

श्रयते आहूयते गौणत्वात्। अपि च नात्रैंद्रोतिवच्छ्रौतो विनियोगः किं लिति करणावमृष्टस्य मं
त्रस्यावघातस्य च समभिव्याहारात् संबंधमात्रं गम्यते तस्मिं सति संभवे गांगिभावः स्यात् सत्सु वाक्यभे
दान्मंत्रलिंगविरोधाच्च न संभवतीति एककालत्वे संबंध इति गम्यते। न खल्वेहीति परस्मैपदरूपस्य
मध्यमपुरुषस्य हविष्कृदिति च संबोधनरूपस्याचेतने अवघाते सामर्थ्यमस्ति। तस्मात्त्रिराहृतिमात्र
विधानादाहूतानां गमंत्रो नायथार्थवघाते ॥३॥ तथा त्सानविसर्जने। उक्तिः ...हाग्नीदग्नीन्वि पं ५
पं ६ हरेति। व्रतं कृणुतेति वाचं विसृजतीति। अत्रापि पूर्ववत्संशयपूर्वपक्षौ। वाक्यभेदस्त्विहां
गांगित्वपक्षेपि नास्तीति तद्वद्युक्तमिति विशेषाशंकायां स्मृतिविनियोगाभावान्मंत्रलिंगविरोधाद्त्रा
पि कालार्थ एव संयोगः कालश्चेह विधीयते न पूर्ववदनूद्यत इति विशेषः ॥४॥ सूक्तवाके कालवि
धिः परार्थत्वात्। दर्शपूर्णमासयोः श्रूयते सूक्तवाकेन प्रस्तरं प्रहरतीति। तत्र संशयः किं प्रस्तरप्रहरणा
स्य सूक्तवाकस्य च कालार्थः संयोगो अथवांगांगिभाव इति। तत्र द्वयोः कृतार्थत्वान्नांगांगित्वं प्रकल्प्य
ते। कालार्थस्तेन संयोगस्तयोर्दर्शादिवद्भवेत् ॥१॥ यथा दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्युक्त
योः कृतार्थत्वात् कालार्थः संयोगः तथेहापि सूक्तवाकस्येष्टदेवताभिधानेन कृतार्थत्वात्प्रहरण

श्रम

१।३

अन्वयाज याज्यानंतरं तस्येपाठात् २

प्रस्तरप्रहरणं तु बर्हिषि प्रस्तरस्य सादनानंतरं विहितं न च गत्प्राजहरणे संभवति सूक्तवाकपाठकारणादिका यो निष्पत्तेरिति तदानीं ज्ञातकालभिति भावः २ प्रस्तर ३

स्य च नाना कर्मापो[illegible]क प्रस्तर प्रतिपादनेन प्रयोजनत्वाद् गां गि ला पेक्षा न्वा वा ल्लू कालार्थः संयोगः सूक्तवाकस्य च प्रह्रियमाणत्व

तत्रापि निर्ज्ञातकालत्वात् सूक्तवाकः प्रस्तरप्रहरणकालं लक्षयति तृतीया चेल्लं भूतलक्षणेन विष्य स्य प्रस्तरज्ञापक

ति न हि कथं चिदपि देवताभिधायिनः सूक्तवाकस्य प्रहरणं गता संभवति प्रहरणे देवता भावादे त्वात्तृतीयापत्तिः २

तः कालार्थ एव संयोगः। एवं प्राप्ते ब्रूमः। श्रुत्या प्रहरणांगत्वं सूक्तवाकस्य गम्यते। तेन तद्देवताया

गादेव होमो भविष्यति। १। तृतीयाश्रुत्या सूक्तवाकस्य करणत्वं गम्यमानं न शक्यमुत्स्रष्टुं न चेल्लं

भूतलक्षणे तृतीये यं कारकविभक्ते र्बलीयस्त्वात्। किं बलीयस्त्वं सर्वो हि संबंधः क्रियागत एव।

तेन सूक्तवाक प्रस्त[illegible] लक्षणा क्रियागतो यं संबंधः न चेह लक्षणा क्रियापात्रा नामनुपात्ताम

पेक्ष्यायं संबंधः प्रत्येतव्य इति विप्रकृष्यते। क्रियाकारकसंबंधस्तु नान्यापेक्ष इति बलीयस्त्वं तेन

करणमेव सूक्तवाकः यद्यपीष्टदेवताप्रकाशनेनासौ कृतार्थस्तथापि विनियुज्यते वचनात् किं हि

वचनं न कुर्यात्। कथं पुनर्देवताभिधायिनः प्रहरणांगता श्रुति विनियुक्त मंत्रा[illegible]ना देवता दभिधेया गबब ४

१८ निरिष्टदेवताभिः संयोगः प्रहरणस्य कल्प्यते तेनायं प्रहरति रिष्टदेवतासंस्कारार्थो होमो न भविष्यतीति ने

नोपपन्नमिष्टदेवताप्रकाशनं कुर्वत एव सूक्तवाकस्य प्रहरणांगत्वं। ५। कृतस्तेनापदेशादुक्तायत्र राम

16 सर्वं वचनं। प्रहरणांगं सूक्तवाक इति स्थितं इदानीमिदं संदिह्यते किं हस्तेन सूक्तवाकः पौर्णमास्या १६

र प्रहरणयो ७

५४ प्रकाशनार्थो मंत्रोयं प्रहरणमपीष्टदेवतासंस्कारार्थमित्युक्तं तत्राभावा
स्याद्देवतापदा ×५

ममावास्यायां च प्रयोक्तव्य उत नेष्टदेवतानुरोधेन विरज्य प्रयोग इति। तत्र सूक्तवाकशब्दस्य सम
स्तानुवाकवचनत्वेनाध्येतॄणां प्रसिद्धेराग्नेयादिनावनानां षसूक्तामप्यन्योन्यनिरपेक्षाणामेकं व२
प्रक ३ थं त्वावात्मकरणावत्तादेकैकस्य कर्मणः सकलः सूक्तवाकांगं प्रयाजादिवत्तत्र सत्यप्येवमेककाल
वर्त्तिनां प्रयाणां तंत्रेण प्रयाजादिवदुपकरोतीति भेदेनं प्रयोक्ष्यते स मुदायद्वयेतु कालभेदात्सकलस्यै न४
वावृत्त्या न वितव्यं नन्विष्टदेवतानि पौर्णमास्यां न प्रयोगार्हाणि प्रयोजनाभावात् इतराण्यपीतर
त्रेति विभागएव प्राप्नोति। नैवं वचनाद्धि सकलप्रयोगोगम्यते तत्राविद्यमानार्थान्यपि पदानि अदृष्टाय
प्रयोक्ष्यंते वचनादिति। उच्यते। विभज्य प्रयोगः प्रयोजनवशादित्युक्तो हेतुः न ह्यदाग्न्यादिशब्दानां पौ
र्णमास्यां प्रयोजनं नाप्यग्नीषोमादिशब्दानामितरत्र प्रयोजनं। यन्नु वचनादित्युक्तं। तन्न। सूक्तशब्द च६
स्यावयवव्युत्पत्त्या इष्टदेवताप्रकाशकमंत्रवचनत्वात् सूक्तं वक्तीति सूक्तवाकः। तनयस्मिन्प्रयोगे
यावत्यो देवता दृष्टा एकाबद्धा वाच्या रूत्यो वा तत्र ता वद्देवतापदप्रयोगादेव संपूर्णाः सूक्तवाकः त
दतिरिक्तानिष्टदेवतापदप्रयोगे प्रत्युत सूक्तवाकत्वं हि स्याद् दुरुक्तवाक एवस्यात् तस्मादिष्टदेवतानु
रोधेन निष्कर्षः। ६॥ लिंगक्रमसमाख्यानात्काम्ययुक्तं समाम्नानं॥ ऐंद्राग्नमेकादशकपालं निर्वपे
दित्यारभ्य इंद्राग्न्यादिलिंगा इष्टयः समाम्नाताः तेनैव लिंगक्रमेण काम्ययाज्यानुवाक्याकांडमि

मा१ द्वि।त१ इति६

त्वेवं समाख्यातं मंत्रकांडं समाम्नातं इंद्राग्नी रोचनादिव इत्यादि मंत्रकांडे संशयः किं यत्र यत्र साम
र्थ्यमस्ति तत्र सर्वत्र विनियोक्तव्या मंत्राः क्रमस[illegible]ख्ये बाधित्वा उत तद्वशेन काम्येष्टिष्वेवेति तदर्थं च किं
लिंगमपि श्रुत्यादिवन्निरपेक्षमेव विनियोजकं उत क्रतुसंबंधबोधकप्रमाणमन्यदपेक्ष्य व्या
पारविशेषमात्रे लिंगस्य प्रामाण्यमिति तत्र लिंगस्याप्यनपेक्षस्य मन्यते विनियोक्तृतां। तद्बली यः क्र
माख्याभ्यामिति सर्वार्थता भवेत्॥११॥ स्वाध्यायविध्यध्यापितस्य तावन्मंत्रस्यावश्यं प्रयोजनेन भवितव्यं जे ५
तत्र मंत्रस्वरूपमेव दृष्ट्वा स्यार्थस्य प्रकाशकोयमतोत्र विनियोक्तव्य [illegible] बुद्धिरुत्पद्यते। न च निःप्रयो
जनस्य प्रकाशनसामर्थ्यं वदितितद्द्वारेण तत्संबंधिकर्माङ्गत्वार्थत्वमपि तत एव गम्यते किमत्र प्रमाणांतरेण। एवं
तत्र क्रमसमाख्याभ्यां प्रबलमिति तद्बाधेन लिंगात्सर्वार्थतेति प्राप्ते ब्रूमः। सत्यं प्रयोजनापेक्षा मं
त्रस्यास्ति तथापि तु। नैव सामर्थ्यमात्रेण विनियोगोस्य संभवी॥१॥ न ह्यपेक्षितमपि प्रयोजनं
प्रमाणमंतरेण ल[illegible] शक्यं न च सामर्थ्यमात्रेण प्रयोजनं किंचित्सम[illegible]तेऽग्न्यादिस्वरूपमात्रप्रति पं
पादनं सामर्थ्यादेव गम्यते न च तावन्मात्रप्रकाशने फलमस्ति कर्माङ्गत्वेन साध्यं न रूपप्रकाशनार्थता
तु न कर्मसंबंधप्रमाणमन्यदंतरेण सामर्थ्यमात्रात्सिध्यति। एषा प्रतिष्ठा[illegible]नाग इ सत्रे तु नागशब्दस्य
त्यागवचनत्वात्क्रतुसंबंधसिद्धिरिति वक्ष्यामः। न चाग्निसूर्यादीनां स्तुत्यादिवत्क्र[illegible]लव[illegible]रिचारायेन क्रतु एम ७

17 १७

दे बुं४

यज्यमानद्रव्यं२

पं२

रूपस्थाप्येतल्लोकेपि तत्संज्ञावात् । इंद्रादीनामपि मंत्रार्थवादेतिहासादिभिः कर्मण्यन्यत्रापि प्रतीतेः तस्मा
क्रतुसंबंधप्रमाणमन्यदपेक्षितं न च मंत्रकांडस्य क्रमसमाख्याभ्यामन्यत्प्रमाणमस्तीति तेन काम्येष्टि
ष्वेवेति तत्रैव विनियोगो न कर्मांतरेषु न च कर्मांतरेषु स्मरणापेक्षयैषां मंत्राणां तत्र विनियोगः तेषामु
पायांतरेणापि स्मृतिसिद्धेरेकांततो मंत्रानपेक्षणात् । यत्र त्वेकांततस्तत्र लब्धत्वेव सामर्थ्यमात्रं दर्पितादर्थ्य ।
यथार्थज्ञानस्यानुष्ठानांगत्वेन हि तद्विनानुष्ठानं सिध्यति यथा चात्मज्ञानस्य सांपरायिकफलक
र्मानुष्ठानोपयिकत्वं इह त्वेकांततो वान्यकर्मांतरेषु विनियोगः क्रमसमाख्यावशात्तु काम्येष्टिष्वेव
यथाक्रमं यथासमाख्यं च याज्यानुवाक्यात्वेन विनियोगः संनवतामसंनवतामपि तोस्त्वेव सामिधे
न्यादौ क्रमसहितेन लिंगेन विनियोगः ॥८॥ अधिकारे च मंत्रविधिरतदाख्येषु शिष्टत्वात् ॥ ज्योतिष्टोमे
काश्चिदाग्नेय्य ऋचो ग्न आयाहि वीतये इत्यादयो विशेषरूपेण संयुक्ताः पठिताः स्तोत्रादौ च वाक्यांत
रेण विनियुक्ताः प्रदेशांतरे चाग्नेय्याग्नीध्रमुपतिष्ठत इति श्रुतं तत्र विचारः किं प्रकृताभिरप्रकृताभि
र्वाग्नेयीभिरिदमुपस्थानं कर्तव्यमुत प्रकृताभिरेवेति । तत्राग्नेयीतिशब्देन सर्वासामभिधानतः । अ
विशेषेण काबिद्धि प्रकृतग्रहणे प्रमा ॥१॥ प्रकरणाद्विशेषोवगम्यत इति चेन्न प्रकरणस्याविशेषकत्वात्
तार्थभि १ यदि ह्याग्नेयीसंस्कार[illegible]दमुपस्थानं स्यात्ततो पूर्वा संबंधिनः संस्काराय योगात्तत्साधनभूताः प्रकृता ग्र

पा८

ह्येरन। उपादीयते त्विहाग्नेयी तृतीया निर्देशात्। अतः शब्दार्थमात्रस्यैवांगत्वोपपत्तेर्न प्रकृतनियमः।
प्रकृतनियमः संनिधानादिति चेन्न। तदभावात्। प्रदेशान्तरे स्तोत्रादावाग्नेय्या विहिताः न तूपस्थानवि
ष्टौ कस्याञ्चिदाग्नेय्याः सन्निधिरस्ति यतस्तद्विषयायमाग्नेयीशब्दः स्यात्। अस्तु वा सन्निधानं तथा
पि स्तोत्रादिकार्यान्तरार्थत्वान्निराकांक्षा नात्र संबंधमर्हति। न ह्यन्यार्थेन सन्निहितेनान्योऽविशिष्यते य घी८
था श्वेन गच्छतीश्वेते न पटेन प्रावृत इति पटसंबंधेन निराकांक्षेण सन्निहितेनापि श्वेतगुणेनाश्वो न विशि
ष्यते तथेहापि। न चाग्नेयीशब्दस्याप्यस्ति विशेषापेक्षा यथा श्रुताग्नेयीशब्दस्याश्वमात्रस्यैव वाक्या
र्थसमवायोपपत्तेस्तेनोभयोर्निराकांक्षत्वात्सत्यपि सन्निधौ न मिथः संबंधः अपेक्षितसंनिधिर्हि सं
बंधकारणं न सन्निधिमात्रं एवं सत्यपि यदि विशेष्येत श्रुतिजनिता विशेषप्रत्ययबाधा श्रुतिरेव
बाधिता स्यात्। ननु यौगिकत्वादाग्नेयीशब्दः सन्निहितामेव व्यक्तिमवलं[illegible] तेनैवमवयवार्थसमन्वितव्य व५
क्तिमात्रवचना यौगिका न सन्निहितवचनाः प्रमाणान्तरेण तु विशेष्यमाणास्तत्रैव व्याप्रियन्ते यथा वैश्व
१८ देव्यामिक्षेति तद्धितः सन्निहितामामिक्षामेवाभिधत्ते। न ह्यत्र विशेषकमस्ति सतोपि सन्निधेरन्या
र्थत्वेनाविशेषकत्वात् न चात्र सोमस्यैवैंद्रवायवत्वम् गन्नुवादेनाग्नेयीत्वं विधीयते येनानुवादस्य
18 सन्निहितगामित्वात्सन्निहितानां च प्रतीयेरन्न् आग्नेयीनां तु सतीनामुपस्थानं प्रत्युपादानात्। रम

दा५ हि५ ष्ट

तस्मात्तत्पविसन्निधाव विशेषः। न च सन्निधिरप्यस्ति प्रदेशान्तरगतत्वादित्युक्तं। तस्मादाग्नेय्या मात्र
ग्रहणमिति प्राप्ते विधीयते। प्रकृता एव ग्रहे रन्त्रसिद्धक नुसंगमाः। तासां कार्यविशेषादि मुखमत्रोप
दिश्यते।१। आग्नीध्रोपस्थानस्य हि द्वे रूपे आग्नीध्रोपस्थानता ज्योतिष्टोमापूर्वसाधनोपयिकव्यापा पो ४
च४ रता च द्वयमपि शास्त्रेणैतेनावगन्तव्यं। अन्यतरेणाप्यन्यतरस्यासिद्धभावान्न हि ज्योतिष्टोमगतो व्या
पारः स आग्नीध्रोपस्थानात्मक एवेति नियमः समस्ति। नाप्याग्नीध्रविषयमुपस्थानं ज्योतिष्टोमग
तव्यापार एवेति नियमः समस्ति ज्योतिष्टोमानोपयिकस्यापि स्पर्शादिवदभिधानस्याग्नीध्रविषय
स्य संभवात्। तेनैकेन शास्त्रसिद्धेनान्यतरस्यार्थापत्त्यानुमानेन वासिद्धभावात् द्वे अपि रूपे शास्त्रेणा
वगन्तव्ये। तद्यद्य प्रकृता निरूपस्थानं विधीयेत तत्तस्योपस्थानरूपमेव स्यात्। तेन लभ्यते न तु ज्योतिष्टोम
व्यापारत्वमस्य कृतत्वात्। न च कर्मीनोपयिकेनोपस्थानमात्रेण फलमस्तीत्यनर्थकं वाक्यं स्यात्। फल
व वाक्यत्वेन च। नन्वेवं घातादिवदुपस्थानस्य प्रकरणोत्क्रतुव्यापारता सिध्यतीति सत्यं सिध्यति नत्वकृति मकल्प
